कृष्णाश्रयस्तोत्रम्

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमदाचार्यचरणकमलेभ्यो नमः ।

कृष्णाश्रयस्तोत्रम् ।

श्रीमत्कल्याणरायचरणविरचितप्रकाशप्रकाशितम् ।

यल्लीलवसंर्स्पान्न रोचन्तेऽन्यदाशिषः ।
तं राधाहृदयानन्ददायकं कृष्णमाश्रये ।।१।।
यत्कृपादृष्टितो जन्तुर्गोविन्दं विन्दते मदा ।
भक्त्याहं तान्निजाचार्यानभिवन्देऽर्थसिद्ध्ये ।।२।।

श्रीकृष्णाश्रयस्य सर्वसाधकत्वात्स्वीयानां तदर्थं वरप्रदानमिव कुर्वन्तः श्रीमदाचार्यचरणाः कृष्णाश्रयस्तोत्रं निरूपयन्ति. तत्राधुना देशादिषट्[१]साधनानामसाधकत्वं वदन्तो भक्तानां भगवानेव सर्वसाधनरूपश्चतुर्विधपुरुषार्थरूप इति, दशलीलानिरूप्य इति, दशविधभक्तसेव्य इति, प्रणानामिवास्य स्तोत्रस्य सर्वसाधकत्वमिति च दशभिः श्लोकैः प्रार्थनाव्याजेन तं स्तुवन्ति. तत्र प्रथमं मुख्याङ्गत्वात्कालस्य तत्रासाधकत्वं वदन्तः कालधर्मनिराकरणपूर्वकमाश्रयं प्रार्थयन्ते :

सर्वमार्गेषु नष्टेषु कलौ च खलधर्मिणि ।
पाषण्डप्रचुरे लोके कृष्ण एव गतिर्मम ।।१।।

सर्वमार्गेष्विति. कलौ खलधर्मिणि खलोऽन्तर्दुष्टो धर्मस्तद्वति सति. ‘खरधर्मिणी’तिपाठे दुःसहचेष्टिते कलौ सतीत्यर्थः. ‘कृषिर्भूवाचके’तिवाक्यनिरूप्यः सदानन्दः पुरुषोत्तम एव मम गम्यत इति गतिराश्रय ऐहिकपारलौकिकार्थसाधकोस्त्विति शेषः. खलधर्ममाहु:लोके जने पाषण्डः प्रचुरः सर्वापेक्षयाधिको यस्मिस्तादृशे सति. अत एव सर्वे मृग्यन्त इति मार्गाः[२] पुरुषार्थोपायाः कर्मज्ञानादयस्तेषु नष्टप्रायेषु सत्सु, पाषण्डप्रवेशादात्मसुखवाचकस्वर्गपदस्य लोकभ्रमजननाच्चित शुद्ध्यजननात्कर्ममार्गस्य, मायावादाभिनिवेशाज्ज्ञानमार्गस्य, निरीश्वरत्वाङ्गीकाराद्योगस्य, विभूतिपरत्वादुपासनामार्गस्य च मुख्यफला साधकत्वेन नष्टप्रायत्वम्. चकारान्महादेवादिषु कलिकालानुगुणेषु सत्सु, एवकारस्य

---

१ काल,देश, द्रव्य, कर्तृ, मन्त्र, कमणाम्. २ यैः कर्मादिभिः पुरुषार्था मृग्यन्ते.

विशेष्यान्विततत्वेनान्ययोगव्यवच्छेदकत्वादंश:[१]कलादियां गतिर्मास्वित्यर्थ:. अन्यार्थकत्वादस्य सिद्धत्वेपि प्रार्थनं न दोषाय. ननु भक्तिमार्गीयाणामपि कलिकालस्य बाधकत्वाद्गृहाद्यासक्तिमत्वाल्लौकिकक्रियापरत्वात्पापसम्भवाच्च भक्तिमार्गस्य कथमुद्धारकत्वं मुख्यफलसाधकत्वं चेति कर्मादितुल्यत्वात्किमाश्रयेणापीति चेत्, मैवं, भक्तिमार्गे स्वदुक्तदुषणानामभावात्. तथाहि – 'कलेर्दोषनिधे'रिति ''कलौ तद्धरिकीर्तनादि''ति ''कलिं सभाणुगणन्'' ''मद्वार्तायातयामानां न बन्धाय गृहा मता:'' ''तावद्रागादय: स्तेना'' इत्यादिवाक्यैर्भगवत्परत्वे गृहादेर्बन्धहेतुत्वाभावात्. ''एवं नृणां क्रियायोगा'' इत्यादिवाक्यैर्लौकिकक्रियाया अप्यलौकिकतुल्यत्वात्. ''मत्कर्म कुर्वता'' मित्यादिवाक्यैर्भगवत्सेवादिना विहिताकरणेपि प्रत्यवायाभावान्, ''धुनोति सर्वं हृदि सन्निविष्ट:'' ''ते मे न दण्डमर्हन्ती'' त्यादिवाक्यै: कदाचित्पातकसम्भवेपि नरकाद्यभावात्कीर्तनादिनैव पापनाशात्. ''सर्वधर्मान्परित्यज्य'' ''अपि चेत्सुदुराचार:'' ''य: कश्चिद्वैष्णवो लोके, ''यानास्थाये''त्यादिवाक्यैराचाराद्यभावेपि फलसिद्धे:. ''धर्म: सत्यदयोपेत:'' ''धर्म: स्वनुष्ठित:'' ''नैष्कर्म्यमप्यच्युतभाववर्जितं'' ''यमादिभिर्योगपथै:'' 'श्रेय:स्रुति'मित्यादिवाक्यै''र्यथा जलौकसां नित्यं जीवनं सलिलं मतम्. तथा समस्तसिद्धीनां जीवनं भक्तिरिष्यत'' इतिबृहन्नारदीयवाक्याच्च भक्तिरहितानां कर्मादीनामसाधकत्वात्, भक्तिसहितानामेव साधकत्वात्. 'यत्कर्मभिर्यत्तपसा' 'चतुर्विधा:' 'अकाम:' 'ज्ञाने प्रयासमुदपास्य' 'किमलभ्यं' 'रूपमारोग्यमर्थां'नित्यादिवाक्यै: केवलभक्तेरपि सर्वसाधकत्वात्. ''परिनिष्ठतोषि नैर्गुण्ये'' ''आत्मारामाश्च'' 'नैकात्मकतां' 'महतां मधुद्वि'डित्यादिवाक्यै: स्वतोपि फलरूपत्वात्. अधुना कर्मादीनामधिकाराणां गतत्वाद्भक्तिमार्गे महदनुग्रहस्याधिकारत्वेनाधिकारिकृतस्यैव सफलत्वादत्राधिकारभेदेन गौणमुख्यफलसम्भवात्. एतदुक्तं 'तत्त्वार्थदीपे':''अधुना ह्यधिकारास्तु सर्व एव गता: कलौ. कृष्णश्चेत्सेव्यते भक्त्या कलिस्तस्य फलाय ही''ति भक्तिसाध्यफलस्यान्येनासम्भवादन्यसाध्यस्य भक्तेरानुषङ्गिकत्वान्न कर्मादितुल्यत्वगन्धोपि. ननु पूर्णभक्तिमार्गस्याधिक्येपीह सामिकृत्स्य तत्तुल्यत्वमिति चेत्, न 'स्मर्तव्य:' 'स्मृते:' 'कृष्ण – कृष्ण'ति ''न वै जनो जातु'' 'कृष्णेति' 'अलोडच्चे'त्यादिवाक्यै: सामिकऽतस्यापि फलसाधकत्वादन्यस्य तदभावादलमुक्तिभि: ।।१ ।।

---

१ एवकारोहि त्रिप्रकारक: अन्ययोगव्यवच्छेदकोऽयोगव्यवच्छेदकोत्यन्तायोगव्यवच्छेदकश्चेति, विशेष्यन्वित: प्रथमो यथा पार्थ एव धनुर्धर:, विशेषणान्वितो द्वितीयो यथा शङ्खः पाण्डुरेव, क्रियान्वितस्तृतीयो यथा नीलं सरोजं भवत्येवेति. २ क्वचिन्नास्ति.

भट्टश्रीगोविन्दराजकृतटिप्पणम् ।

मिलिन्दवृन्दोपमचारुकेशं सुभक्तशेषं सुखकारिदेशम् ।
पयोदनीकाशमनोज्ञवेशं तं वेमटेशं शरणं प्रपद्ये ।।
नत्वा श्रीवल्लभाचार्यचरणे शरणे सताम् ।
कृष्णाश्रयप्रकाशस्य व्याख्यानं सुनिरूप्यते ।।

संस्पर्शादिति. सम्यक् सम्बन्धादित्यर्थ:. सम्बन्धे सम्यक्त्वं चात्रान्यापरिभूतत्वम्. **अन्यदाशिष** इति. न च अन्याश्च ता आशिषश्चेति विग्रहे अन्याशिष इति भाव्यमिति वाच्यम्, ''अषष्ठ्यतृतीयास्थस्ये''ति दुगागमात्. **राधाहृदयानन्ददायकमिति**. राधाहृदयानन्दं ददातीति. तथा. भगवत्सुखस्यानन्दरूपत्वान्नानुपपत्ति: काचित्, इतरथाऽव्याप्यवृत्तित्वेन सुखकथनस्यैवोचितत्वात्. अत एवोक्तं 'प्रेमामृत'टीकायाम् ''आनन्दोन्त:करणदेहादिसर्वव्यापक: सुखमव्याप्यवृत्ती''ति. ननु ''आनन्दाद्ध्येव खल्विमानि भूतानि'' ''सत्यं विज्ञानमानन्दं ब्रह्मे''त्यादिभि: श्रुतिभिरानन्दस्य भगद्रूपत्वात्स्वदायक इत्यर्थ: पर्यवसन्न इति चेत्, इष्टापत्ते:, स्वरूपदानस्योचितत्वात्. एतेनानयोरभेद: सङ्गच्छते. तदुक्तमाथर्वणीयकृष्णोपनिषदि ''पूर्णप्रेमास्पदी राधा श्रीकृष्णमनसोद्भवा'', तस्मान्न भिन्नेति. **यत्कऽपादृष्टित** इति. स्वीयत्वेन परिग्रहादित्यर्थ:. अभिवन्द इति. भक्त्यार्थसिद्धये निजाचार्यानभिवन्द इति सम्बन्ध:.तत्र सेवाविषयकप्रेम्णा निर्विघ्नग्रन्थपरिसमाप्तिसिद्ध्यर्थं निजाचार्यनमस्काररूपं मङ्गलं करोमीत्येतद्वाक्यार्थ:. सेवा त्वत्र नमनादिरूपा. न च प्रेमविशिष्टसेवयेति वक्तुमुचितं, प्रत्वयार्थस्यैव प्राधान्यात्. तथा चोक्तमस्मदाचार्यैर्निबन्धे ''धात्वर्थ: सेवा प्रत्यार्थ: प्रेमेति''. तत्त्वार्थदीपे तु 'प्रेमसेवात' इति फलितार्थकथनम्, अन्यथा ''प्रत्ययार्थ: प्रधानं प्रकृत्यर्थे विशेषणमि''तिन्यायविरोध: स्यात्. वस्तुतस्तु एतस्य सामान्यन्यायत्वेन विशेषन्यायस्यैव बलीयस्त्वात्. एतदुक्तं विवरणे 'प्रकृतिप्रत्यययो: प्रत्ययार्थस्य प्राधान्यमितिसामान्यन्यायादिच्छाविषयतया शब्दबोध्य एव शाब्दसाधनतान्वय इति स्वर्गकामादिवाक्ये क्लृप्तविशेषन्यायस्य बलीयस्त्वादश्वेन जिगमिषति असिना जिघांसतीत्यादिलौकिकप्रयोगेश्वादिरूपसाधनस्य तदन्वेष्टव्यं तद्विजिज्ञासितव्यं मन्तव्यमित्यादिवैदिकप्रयोगे तव्यार्थभूतविधेश्च 'सन्'प्रत्ययाभिहितेच्छाविषय एव गमनादावन्वयस्य व्युत्पन्नत्वाच्च प्रकृत्यभिहितायां विद्यायां यज्ञादीनां विनियोग इति. ननु 'भावे' इत्यधिकारात्प्रत्ययार्थस्य भावत्वमुचितं न तु प्रेमत्वमिति चेत्,

अत्रोच्यते, भावार्थकत्वं तु प्रत्यस्य तावदुभयवादिसिद्धमेव, तत्र भावशब्देन देवादिविषयिणी रति: प्रकृते सर्ग:. पुरुषाह्ब्रह्मादीनामुत्पत्तिर्विसर्ग:. उत्पन्नानां तत्तन्मर्यादया पालनं स्थानम्. स्थितानामभिवृद्धि: पोषणम्. पुष्टानामाचार ऊति:. तत्रापि सदाचारो मन्वन्तरम्. तत्रापि विष्णुभक्तिरीशानुकथा. भक्तानां प्रपश्चाभावो निरोध:. निष्प्रपञ्चानां स्वरूपलाभो मुक्ति:. मुक्तानां ब्रह्मस्वरूपेणावस्थानमाश्रय इति’’. **दशविधभक्तसेव्य** इति. सात्त्विकसात्त्विका:, सात्त्विकराजसा:, सात्त्विकतामसा:. राजसराजसा, राजससात्त्विका, राजसतामसा:. तामसतामसा:, तामसराजसा:, तामससात्त्विका:. एके निर्गुणा इत्येतैर्दशविधैर्भक्तै: सेव्य इत्यर्थ. प्रार्थनाव्याजेन स्तुवन्तीति. ‘‘किमासनं ते गरुडासनाये’’त्यनेन **प्रार्थनाव्याजेनैव स्तुतिनिरूपणस्यैवोचितत्वादिति** भाव:. गम्यते प्राप्यत इत्यर्थ:. ननु ‘भावे’ इत्यधिकारात्कथमत्र कर्मणि प्रत्यय इति चेत्, सत्यम्, ‘‘कृत्यल्युटो बहुल’’मित्यत्र ‘बहुल’मितियोगविभागात्तथा. अत एव ‘‘एवं च बहुलग्रहणं योगविभागेन कृन्मात्रस्यार्थव्यभिचारार्थं पादाभ्यां हियते पादहारक: कर्मणि ण्वुल्’’ इति वैयाकरणशिरोमणय:. पाषण्ड इति. वेदविरुद्धत्वं पाषण्डत्वम्. आत्मसुखवाचकेति. ‘‘यन्न दु:खेन सम्भिन्नं न च ग्रस्तमनन्तरम्. अभिलाषोपनीतं च तत्सुखं स्व:पदास्पद’’मित्यनेन स्वर्गपदस्यात्मसुखवाचकत्वादित्यर्थ:. लोकभ्रमजननादिति. लोकत्वेन भ्रमजननादित्यर्थ:. **मायावादा**भिनिवेशादिति. विवर्ताधिष्ठानत्वेन मायोपहितब्रह्मण: कर्तृत्वकथनामित्यर्थ:. विवर्तस्तु **अतात्त्विकोऽन्यथाभास:**. यद्वा, वस्तुनस्तदसमसत्ताको विवर्त:. अथवा कारणविलक्षणोऽन्यथाभावो विवर्त:. कारणभेदं विनैव तद्व्यतिरेकेण दुर्वचं कार्यं विवर्त इति वा. **निरीश्वरत्वाङ्गीकाराद्योगस्येति**. निर्बीजयोगाङ्गीकारादित्यर्थ:. योगस्तु चित्तवृत्तिनिरोध: स तु भगवद्ध्यानार्थमङ्गत्वेनोपयुक्त एक:. ध्यानाभावेप्यात्प्रबोधाङ्गभूतो द्वितीय:. उभावपि प्रामाणिकौ. यस्तु स्वतन्त्रतया फलसाधकत्वेन प्रोक्तस्तथासिद्धिहेतुर्ज्ञानात्मा वा तथान्ये देहेन्द्रियादिसाधकास्तेऽप्रामाणिका:. सर्वभेतच्च निबन्धे स्पष्टम्. **कलिकालानुगुणेष्विति**. ‘‘द्वापरादौ युगे भूत्वा कलया मानुषादिषु. स्वागमै: कल्पितैस्त्वं च जनान्मद्विमुखान् कुरु’’ ‘‘मां च गोपय येन स्यात्सृष्टिरेषोत्तरोत्तरे’’त्यादिपद्मपुराणाद्युक्तवचनैर्महादेवादीनां कलिकालनुगुणत्वस्य सिद्धत्वादित्यर्थ:. **अन्यार्थकत्वादिति**. अत्र प्रमाणभूता: ‘‘शुभिके शिर आरोह शोभयन्ती मुखं मम. ममाग्ने वर्चो विहवेष्वस्त्वि’’त्यादय आगमा अनुसन्धेया इति भाव:. ‘‘कलेर्दोषनिधे’’रित्यारभ्या‘‘भवोपि फल्गु’’रित्यन्तानां वचनानां

सङ्ग्रह: ‘‘कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुण:. कीर्तनादेव कृष्णस्य मुक्तबन्ध: परं व्रजेत्’’ कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखै:. द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात्’’ ‘‘कलिं सभाजयक्त्यार्या गुणज्ञा: सारभागिन:. यत्र समीर्तनादेव सर्व: स्वार्थोपि लभ्यते’’ ‘‘श्रृण्वन् गृणन् संस्मरयंश्च चिन्तयन् नामानि रूपाणि च मङ्गलानि ते. क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचित्तो न भवाय कल्पते’’ ‘‘गृहेष्वाविशतां वापि पुंसां कुशलकर्मणाम्. मद्वार्तायातयामानां न बन्धाय गृहा मता:’’ ‘‘तावद्रागादय: स्तेनास्तावत्कारागृहं गृहम्. तावन्मोहोङ्घ्रिनिगडो यावत्कृष्ण न ते जना:’’ ‘‘एवं नृणां क्रियायोगा: सर्वे संसृतिहेतव:. त एवात्मविनाशाय कल्पन्ते कल्पिता: परे’’ ‘‘मत्कर्म कुर्वतां पुंसां काललोपो भवेद्यदि. तत्कर्म तस्य कुर्वन्ति तिस्र: कोट्यो महर्षय:’’ ‘‘स्वपादमूलं भजत: प्रियस्य त्वक्तान्यभावस्य हरि: परेश:. विकर्म यच्चोत्पतितं कथञ्चित् धुनोति सर्वं हृदि सन्निविष्ट:’’ ‘‘एवं विमृश्य सुधियो भगवत्यनन्ते सर्वात्मना विदधते खलु भावयोगम्. ते मे न दण्डमर्हक्त्यथ यद्यमिसां स्यात्पातकं तदपि हक्त्युगारुगायवाद:’’ ‘‘ते देव सिद्धपरिगीतपवित्रगाथा ये साधव: समदृशो भगवत्प्रपना:. तान्नोप्रसिदत हरेर्गदयाभिगुक्तान्नैषाम वयं न च वय: प्रभवाम् दण्डे’’ ‘‘सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज. अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुच’’ ‘‘अपि चेत्सुदुराचारो भजते मामनन्यभाक्. साधुरेव स मन्तव्य: सम्यग्व्यवहितोहि स:’’ ‘‘य: कश्चिद्वैष्णवो लोके मिथ्याचारोप्यनाश्रमी. पुनाति सकलान् लोकान् सहस्त्रांशुरिबोदित:’’ ‘‘यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित्. धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह’’ ‘‘धर्म: सत्यदयोपेत: विद्या वा तपसान्विता. मद्भक्त्यापेतमात्मानं न सम्यक् प्रपनाति हि’’ ‘‘धर्म: स्वनुष्ठित: पुंसां विष्वक्सेनकथासु य:. नोत्पादयेद्यदि रतिं श्रम एव हि केवलम्’’ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्. कृत: पुन: शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम्’’ ‘‘यमादिभिर्योगपथै: कामलोभहतो मुहु:. मुकुन्दसेवया यद्वत्तथात्माद्धा न शाम्यति’’ ‘‘श्रेय:स्रुतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये. तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम्’’ ‘‘यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्. योगेन दानधर्मेण श्रेयोभिरितरैरपि’’ ‘‘सर्वं मद्भक्तियोगेन मद्भक्तो लभतेञ्जसा’’ ‘‘चतुर्विधा भजन्ते मां जना: सुकृतिनोर्जुन. आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ’’ ‘‘अकाम: सर्वकामो वा मोक्षकाम उदारधी:. तीव्रेण भक्तियोगेन यजेत पुरुषं परम्’’ ‘‘ज्ञाने प्रयासमुदपास्य नमन्त एव जीवन्ति सन्मुखरितां भवदीयवार्ताम्. स्थाने स्थिता: श्रुतिगतां तनुवाङ्मनोभिर्ये प्रायशोजित

जितोप्यसि तैस्त्रिलोक्याम्''. ''किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने. तथापि तत्परा राजन् नहि वाञ्छन्ति किञ्चन'' ''रूपमारोग्यमर्थांश्च भोगांश्चैवानुषङ्गिकान्. ददाति ध्यायतो नित्यमपवर्गप्रदो हरिः'' ''परिनिष्ठितोपि नैर्गुण्ये उत्तम श्लोकलीलया गृहीतचेता राजर्षे आख्यानं यदधीतवान्'' ''आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे. कुर्वक्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः'' ''नैकात्मतां मे स्पृहयन्ति केचिन्मत्पादसेवाभिरता मदीहाः. येन्योन्यतो भागवताः प्रसज्य सभाजयन्ते मम पौरुषाणि'' ''महतां मधुद्विट्सेवानुरक्तमनसामभवोपि फल्गु''रिति. भक्तिसाध्यफलस्येति भगवत्स्वरूपपाप्तेरित्यर्थः. तदुक्तमस्मत्प्रभुभिर्भक्तिहंसे'' ''भक्तौ च न स्वरूपातिरिक्तफलकत्व''मिति. 'स्मर्तव्य'इत्यारभ्य 'तदभावा'दित्यन्ते वचनानि तु स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित्. सर्वे विधिनिषेधाः स्युरेतस्यैव च किमराः'' ''स्मृतेः सकलकल्याणभाजनं यत्र जायते. पुरुषं तमजं नित्यं व्रजामि शरणं हरिम्'' ''कृष्ण कृष्णेति – कृष्णेति यो मां स्मरति नित्यशः. जलं भित्त्वा यथा पद्मं नरकादुद्धराम्यहम्'' ''कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्तते. भस्मीभवन्ति राजेन्द्र महापातककोटयः'' ''न वै जनो जातु कथंचनाव्रजेन्मुकुन्दसेव्यन्यवदङ्ग संसृतिम्. स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो यतः'' ''आलोड्य सर्वशास्त्राणि विचार्य च पुनः – पुनः. इदमेकं सुनष्पन्नं ध्येयो नारायणः सदे''ति. तत्र नवविधा भक्तिर्निदानं, ततःप्रेम, तेन च विशिष्टरूपभगवत्प्राप्तिः, सैव फलमिति फलसहितपूर्णभक्तिमार्गस्वरूपम्. अत एव सर्वनिर्णये ''सज्ञानक्रियोभयतयुतः स एव फलं, तत्रापि साधनं प्रेमैव तत्साधनं नवविधा भक्ति''रिति श्रीमदाचार्यवर्य्याः. तथा च सामिकृतस्यापि स्मरणपर्यन्तं विहितस्यापि कायवाग्विनियोगस्नेहाभावेपि मनोपात्रस्थित्यैव तादृशपुरुषविहितस्य वा फलसाधकत्वमिति स्पष्ट एवेतरेभ्य उत्कर्षः. तथाचोक्तं निबन्धे : ''कायवाग्विनियोगाभावेपि स्नेहाभावेपि मनोमात्रस्थितौ फलमेतदि''ति. कर्ममार्गस्य तु न तथा, साङ्गाद्वैदिककर्मणः फलावश्यम्भावनियमादिति तत्त्वम् ।।१ ।।

प्रकाश

ननु पुण्यदेशस्थितिमात्रेणापि पुरुषार्थसिद्धेः किमितीतरव्यवच्छेदपूर्वकमाश्रयप्रार्थनमित्याशङ्क्य देशानामसावकत्वं वदन्त आश्रयं प्रार्थयन्ते :

म्लेच्छाक्रान्तेषु देशेषु पापैकनिलयेषु च ।
सत्पीडाव्यग्रलोकेषु कृष्ण एव गतिर्मम ।।२ ।।

म्लेच्छाक्रान्तेष्विति. देशेषु हीनैराक्रान्तेषु सत्सु. ननु म्लेच्छा अपि न्यायवर्तिनश्चेत्तदा को दोषस्तत्राहुः **पापैकनिलयेष्विति**. पापरूपा एव ते तदेकनिलयेषु, पापा ये मुख्यास्तन्निलयेषु, पापस्य वा. अथवा पूर्वोक्तषु पापैकनिलयेषु च अङ्गबङ्गादिषु यत्र मनमात्रेण पुनः संस्कारसम्भवः. ननु लोका वणिजादयः समीचीनश्चेत्पापैः

---

१ अङ्गबङ्गकलिङ्गेषु सौराष्ट्रमगधेषु च. तीर्थयात्रां विना गच्छन् पुनः संस्कारमर्हतीति स्मृतेः.

किं कार्यमत आहु:सदिति. साधूनां पीडया व्यग्राः स्वधर्माचरणमेवानिष्टहेतुः प्रत्यक्षत्वान्न कार्यमुत प्राकृतं कर्म येति व्याकुला लोका येषु. सद्धर्मस्य शुभहेतुत्वानिश्चयेन श्रद्धाद्यभावात्तेपि सहाया न भवन्तीत्यर्थः. ''अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः. यैर्जन्म लब्धं नृपु भारताजिरे मुकुन्दसेवौपयिकं स्पृहा हि न'' इत्यादिवाक्यैर्देशानां कृष्णाश्रितानुकूलत्वात्. शेषं पूर्ववत् ।।२ ।।

टिप्पणम्

पापा ये मुख्या इति. फलितार्थकथनमेतत्, इतरथा विशेषणसमासे 'पूर्वकालैके'त्यनेनैकशब्दस्य पूर्वनिपातः स्यात्. विग्रहस्तु पापेषु ये मुख्या इति. यत्र गमनमात्रेण पुनः संस्कारसम्भव इति. ''अङ्गबङ्गकलिङ्गेषु सौराष्ट्रमगधेषु च. तीर्थयात्रां विना गच्छन् पुनः संस्कारमर्हती''त्यनेन तथेत्यर्थेः ।।२ ।।

प्रकाश

ननु गङ्गादितीर्थैरपि सर्वपुरुषार्थसिद्धे किं केवलाश्रयेणेत्याशङ्क्य द्रव्याणामसाधकत्वं वदन्तस्तीर्थानामाहु :

गङ्गादितीर्थवर्येषु दुष्टैरेवावृतेष्विह ।
तिरोहिताधिदैवेषु कृष्ण एव गतिर्मम ।।३ ।।

गङ्गादीति. गङ्गादीनि यानि तीर्थश्रेष्ठानि तेषु दुष्टैरेवावृतेषु सत्सु, अतो न तैः **पुरुषार्थसिद्धिः**. ननु कथं दुष्टैरेवावृतत्वं तत्र ब्राह्मणादीनामपि सत्त्वात्, न, अतिपरिचयादनादरेण तत्र भक्त्यभावेन प्रतिग्रहाद्यपाधिभिरवस्थानाच्च तेषामपि दुष्टत्वमेव. ननु सर्वदोषनिवारकेषु तेषु सत्सु दुष्टत्वमसम्भवीति चेत्, न, ''सर्वेण गाङ्गेन जलेन सम्यङ्मृत्स्नाशतेनाप्यथ भावदुष्टः. आजन्मतः स्नानपरोपि नित्यं न शुद्ध्यतीत्येव वयं वदाम'' इत्यादित्यपुराणवचनात्, ''मत्स्यकच्छपमण्डूकास्तोये मग्ना दिवानिशं. वसन्तोपि च ते स्नानात्फलं नार्हन्ति कर्हिचित्'' ''श्रद्धाविधिसमायुक्तं यत्कर्म क्रियते नृभिः.

टिप्पणम्

द्रव्याणामसाधकत्वंवदन्तस्तीर्थानामिति.तीर्थस्य तद्देशावच्छिन्नप्रवाहात्मकाध्यात्मिकदेवतारूपत्वेन द्रव्यत्वमितिभावः. अत एवोक्तमस्मत्प्रभुभि'निबन्धे' द्वितीयस्य प्रवाहरूपतया तीर्थत्वमि'ति. यादवकोशेपि :''तीर्थं मन्त्राद्युपाध्यायशास्त्रेष्वम्भसि पावन''इति.''उक्तं च दशमस्कन्धीयसुबोधिन्यां देवतारूपत्वं ''कालिन्दीति समाख्यते''त्यस्य व्याख्याने ''आध्यात्मिकं देवतारूपमि''ति.''प्रायश्चित्तानि चीर्णानी''तिवचनत्रयाणि

---

१ क्वचित्पुंल्लिङ्गपाठः

प्रकाश

शुचि शुद्धेन भावेन तदानक्त्याय कल्पते'' ''विधिहीनं भावदुष्टं कृतमश्रद्धया च यत्. तद्धरक्त्यसुरास्तस्य सुमूढस्याकृतात्मन'' इति योगियाज्ञवल्क्यवचोभिः, ''अश्रद्दधानः पापात्मा नास्तिकोच्छिन्नसंशयः. हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिन'' इति वायुपुराणवचनाच्च, ''प्रायश्चित्तानि चीर्णानी''त्यादिभिश्च तेषां भगवद्बहिर्मुख्यनास्तिक्यादिदोषानिवारकत्वात्. ननु वस्तुशक्त्यां सत्यां कथमेतत्, न ह्यग्निः कदाचिन्न दहतीत्याङ्क्याधिदैविकदेवतारूपतिरोधानाद्वस्तुन एवाभावादित्याहु: **तिरोहिताधिदैवेष्विति**. दुष्टान्प्रत्याधिदैवतिरोधानात्सतः प्रत्येव प्राकट्यात्, अत एव श्रीभागवतार्थतत्त्वदीपे 'तीर्थादावपी'ति. अत एव सतां ''तीर्थीकुर्वन्ति तीर्थानी''त्यनेन तीर्थीकरणमुच्यते. आधिदैविकाभावे जले दृश्यमानदोषाभावात्किं तीर्थीकरणं स्यात्. शेषं प्राग्वत् ।।३ ।।

टिप्पणम्

''प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखम्. न निष्पुनन्ति राजेन्द्र सुराकुम्भमिधापगाः'' ''तीर्थादावपि या मुक्तिः कदाचित्कस्यचिद्भवेत्. कृष्णसादयुक्तस्य नान्यस्येति विनिश्चयः'' ''भवद्विधा भागवतास्तीर्थीभूताः स्वयं प्रभो. तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृते''ति ।।३ ।।

प्रकाश

ननु कर्तृसमीचीनत्वे सर्वफलसिद्धेः किमाश्रयेऽन्यव्यवच्छेदेनेत्याशङ्क्य कर्तॄणामसाधकत्वं वदन्त आश्रयं प्रार्थयन्ते:

अहमारविमूढेषु सत्सु पापानुवर्तिषु ।
लाभपूजार्थयत्नेषु कृष्ण एव गतिर्मम ।।४ ।।

अहमारविमूढेष्विति. सत्सु पण्डितेषु अहमारेण वयं शास्त्रज्ञा इतिगर्वेणान्यं पृच्छक्त्यपि नेति मायावादाद्यभिनिवेशाद्विशेषेण मूढेषु सत्सु. ज्ञानवत्कृतिरपि तेषां दुष्टेत्याहु: **लाभपूजार्थयत्नेष्विति**. लाभपूजार्थमेव यत्नो येषां, ते पारमार्थिकमपि कर्म लाभपूजाभ्यामेव कुर्वन्ति. पापान् पुंसः, पापं वानुवर्तन्तेऽतः सङ्गान्नदोषाभ्यां दुष्टत्वान्न तेषां स्वतः फलसिद्धिराश्रये तु भगवत्कृपायां स्वत एव वेदार्थस्वदोषयोः स्फुरणात्फलसिद्धिः, भगवान् भगवदीयो वा वेदार्थं जानातीति भक्तानामेव वेदतात्पर्यज्ञानात्. शेषं सुगमम् ।।४ ।।

पूर्ववदाशङ्क्य मन्त्राणामसाधकत्वं वदन्त आश्रयं प्रार्थयन्ते:

अपरिज्ञाननष्टेषु मन्त्रेष्वव्रतयोगिषु ।
तिरोहितार्थदेवेषु कृष्ण एव गतिर्मम ।।५ ।।

---

१ कर्तृसमीचीनत्वेनेति ख.ग.

अपरिज्ञानतष्टेष्विति. मन्त्रा वैदिका आगमोक्ताश्च, तेषु **अपरिज्ञाननष्टेषु** अपरिज्ञानेन तात्पर्यफलदेवतास्वरूपाज्ञानेन नष्टप्रायेषु सत्सु. वैदिकानां गुरुकुलवासब्रह्मचर्यशूद्रासन्निध्यायराहित्यपूर्वकं पठितानां साधकत्वेनाव्रतयोगिनामसाधकत्वात्. आगभोक्तानां तात्पर्याज्ञानेनार्थदेवयोस्तिरोभावादसाधकत्वात्. भगवदाश्रये तु ''यस्य स्मृत्ये''त्यादिवाक्यैः ''सव सम्पूर्णतां याती''ति मन्त्राणामपि साधकत्वात् ।।५ ।।

ननु मीमांसादिना मन्त्रतात्पर्यनिर्धारात्कर्मभिरेव फलसिद्धेः किमाश्रयेणेत्याशङ्क्य कर्मणामसाकधत्वं वदन्त आश्रयं प्रार्थयन्ते:

नानावादविनष्टेषु सर्वकर्मव्रतादिषु ।
पाषण्डैकप्रयत्नेषु कृष्ण एव गतिर्मम ।।६ ।।

नानावादविनष्टेष्विति. कर्माणि सोमयागादीनि, व्रतादीनि च, तेषु सर्वेषु प्रपञ्चः सर्वोपि मिथ्येति वेदानामपि तथात्वात्प्रपञ्चवत्स्वाज्ञानकल्पितत्वेनवेदानां तद्बोधितानां च व्यवहारमात्रेण प्रामाण्यान्न किञ्चित्कर्तव्यं प्राप्तव्यं वास्तीति केषाञ्चिद्वादः, ''परमेष्ठिनो वा एष यज्ञोग्र'' इत्यादिवाक्यैर्ब्रह्मादीनामपि यज्ञैरेवोत्कर्षात्पूर्ववासनात एवोत्तरोत्तरप्रवृतेः कर्कैव कर्तव्यं तेनैव फलं न कोप्युपास्यः फलदाता प्रवर्तको वा, देवतापि चेतना नास्ति किन्तु मन्त्रमप्येवेति न देवताप्रीतिव्यापारः फलं वेति केषाञ्चिद्वादः, शास्त्रेण षोडशपदार्थविवेकानन्तरं श्रवणमनननिदिध्यासनैः स्वात्मसाक्षात्कारे सति दुःखात्यन्ताभाव एव फलं न भगवान्सेव्यः फलं वेति केषाञ्चिद्वादः, प्रकृतितद्विकारोपधानविलये पुरुषस्य स्वरूपेणावस्थानं फलं, न भगवानिति केषाञ्चिन्मतम्, एवंविधैर्नानावादैर्विशेषेण नष्टेषु सत्सु. विपरीतार्थनिश्चयेन फलं, न भगवानिति केषाञ्चिन्मतम्, एवंविधैर्नानावादैर्विशेषणेन नष्टेषु सत्सु. विपरीतार्थनिश्चयेन फलाजनकत्वाद्विनाशः. वस्तुतः ''पुरुष एवेदं सर्वं'' ''ऐतदात्म्यमिदं सर्वं'' ''सर्वस्य वशी सर्वस्येशानः'' ''एष उ एव तं साधु कर्म कारयति'' ''अहं सर्वस्य प्रभवः'' ''को नु राजन्निन्द्रियवान्'' ''देवोसुरो मनुष्यो वा'' ''फलमत उपपत्तेः'' ''त एवं तृप्तास्तर्पयक्त्येनमि''ति ''देवा वै सत्रमासत'' ''विशते तदनन्तरम्'' 'मामेवैष्यसि' ''आनन्दं ब्रह्मणो रूप'' मित्यादिश्रुतिस्मृतिपुराणन्यायैः प्रपञ्चस्य ब्रह्मात्मकत्वात्सत्यत्वेन कर्तव्यस्य सफलत्वाद्भगवतः सर्वेश्वरत्वेन सेव्यत्वात्प्रवर्तकत्वात्फलदातृत्वात्तृप्रितसत्रकरणाद्यनुपपत्त्या देवतानामपि चेतनत्वाद्भगवत्सायुज्यस्य मोक्षत्वादानन्दरूपत्वेन भगवत एव फलरूपत्वात्पूर्वोक्तवादानां प्रलपितकल्पत्वात्. स्वमताग्रहेणैव निषिद्धदशम्यादिविद्धैकादश्यादिव्रतकरणाच्च.

टिप्पणम्

प्रलपितकल्पत्वादिति. यत्तु ‘‘शास्त्रदीपिकायां नवमाध्याये ‘देवता वा प्रयोजयेत् अतिथिवद्भोजनस्य तदर्थत्वादि’’त्यधिकरणे ‘‘यद्यपि विग्रहवती प्रतिगृह्य भुक्त्वा व्रजति प्रसीदति च तथापि यागादेव फलं विग्रहवती चानित्या स्यात्, ततश्च नित्यवेदविषयत्वं न स्यात्, सत्यपि विग्रहे प्रत्तस्य हविषो देवतया भोगः प्रत्यक्षविरुद्धोशक्योभ्युपगन्तुम्, न चाभुञ्जाना प्रसीदतीति युक्तम्, अत एवाप्रतिपन्नापूर्वत्यागे देवताप्रसादे वा फलमित्येतदपि निरस्तं, न हि तस्याः प्रसादः सम्भवतीत्युक्त’’मिति पार्थसारथिमिश्राः तत्प्रौढिवादमात्रमेव. तथाहि: ‘‘यदुक्तं विग्रहवती चानित्या स्यात्ततश्च नित्यवेदविषयत्वं न स्यादि’’ति, तदपेशलं, अनित्यानामपि यागादीनां वेदविषयत्वात्, विग्रहवत्त्वेनैव फलजनकत्वस्य ‘‘तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयती’’त्यादिश्रुत्युक्तत्वाच्च. मुख्यार्थाबाधेन न श्रुतेरुपचरितार्थत्वम्. अर्थवादानां स्वतः प्रामाण्यं न तु विध्येकवाक्यतया. एतेनास्मिन्नेवाधिकरणे यच्छाबरभाष्ये सिद्धान्तितं तत्स्वमताग्रहमात्रमेव. प्रकृतमनुसरामः. यदपि ‘‘सत्यपि विग्रहे प्रत्तस्य हविषो देवतया भोगः प्रत्यक्षविरुद्धोशक्योभ्युपगन्तुमि’’ति, तदप्यविचाररमणीयम्. विश्वादीनामपि प्रत्यक्षभोगाभावत्वेन ‘‘सर्वमनुष्या विष्णुनाऽशितमश्नन्ती’’तिश्रुतौ ‘‘पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति. तदहं भक्त्युपहृतमश्नामि प्रयतात्मन’’ इति स्मृतौ ‘‘विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम्. पितृभ्यश्चापि तद्देयं तदानक्त्याय कल्पते’’ ‘‘पितृशेषं तु यो दद्यात् हरये परमात्मने. रेतोधाः पितरस्तस्य भवन्ति क्लेशभागिन’’ इति स्कान्दे ‘‘यः श्राद्धकाले हरिमुक्तशेषं ददाति भक्त्या पितृदेवतानाम्. तेनैव पिण्डांस्तुलसीविमिश्रानाकल्पकोटिं पितरस्तु तृप्ता’’ इति ब्राह्मे च प्रतिपादितस्य भोगस्य विरोधापत्तेः. यत्तु निर्णयसिन्धुः ‘‘एतत्सर्वं निबन्धविरोधान्निर्मूल’’मिति, तन्न, श्रीधरस्वामिनृसिंहपरिचर्यादिमूलं वदतः स्वस्यैव वदद्व्याघातात्. एतेन ‘‘न चाभुञ्जाने’’त्यारभ्य ‘‘प्रसादः सम्भवतीत्युक्त’’मित्यन्तं यदुक्तं तदेतेनैव निरस्तम्. वस्तु–तस्तु विशिष्ट एव देवतेति न काप्यनुपपत्तिः. एतेन तदुक्त कर्ममार्गस्य प्रलपितकल्पत्वं सिद्धमिति निगर्वः. यत्तु मुक्तावल्यामात्मनिरूपणे ‘सुतरामीश्वरभेद’ इत्यारभ्य ‘‘परमं साम्यमुपैतीति श्रूयते’’इत्यन्तं पञ्चाननभट्टाचार्या आहुस्तत्प्रामादिकमेव. तथाहि यदुक्तं ‘‘सुतरामीश्वरभेदोऽन्यथा बन्धमोक्षानुपपत्ते’’रिति, तत्तुच्छं, बन्धस्य सांसारिकजीवविषयत्वेन सुतरां भेदाभावात्. यदपि ‘योपीश्वराभेद’ इत्यारभ्य ‘समर्पिता’इत्यन्तं वदन्ति तदपि तथा. तथाहि अभेदबोधिका किल ‘‘ब्रह्म वेद ब्रह्मैव भवती’’ति श्रुतिः. नहि तदीयत्वप्रतिपादनद्वारा स्तुतिस्तस्याः शक्योर्थोपि त्वौपचारिकः, न च श्रुतेरूपचरितार्थत्वं सम्भवति मुख्यार्थाबाधात्. अत ए‘‘वांशो नानाव्यपदेशा’’दित्यधिकरणे ‘‘अद्वैतश्रुतयस्तु जातिदेशकालाभेदेन निमित्तोपचारादि’’ त्युक्त्वा ‘‘न च यत्परास्तदौपचारिकं युक्त’’मित्युक्तं वाचस्प तिमिश्रैः. न च ‘‘सर्व एवात्मानः समर्पिता इति श्रुतिविरोधः, सर्वात्मनां तत्त्वेनैव भवनमिति तदर्थात्. यदपि ‘‘मोक्षदशायामज्ञाननिवृत्तावभेदो जायते इत्यपि न, भेदस्य नित्यत्वे नाशायोगात्’’ तदप्यसत्, भेदस्य भ्रममात्रविषयत्वेन वस्तुन एवाभावात्. यदपि ‘‘भेदनाशेपि व्यक्तिद्वयं स्थास्यत्येवे’’ति तदपि न ‘‘एष सम्प्रसादः अस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते’’ इत्यादिश्रुतिविरोधात्. एतेन ‘‘न च द्वित्वमपी’’त्यारभ्य ‘‘सर्वजनसिद्धत्वा’’दित्यन्तं यदुक्तं तत्सर्वमनेनैव परास्तम्. यदपि ‘‘योपि तदानीमभेदप्रतिपादक आगमः सोपि निर्दुःखत्वादिना साम्यं प्रतिपादयति सम्प्रदाधिक्ये पुरोहितोयं राजा संवृत्त इतिवदि’’ति, तदपि न लब्धवर्णप्रतीक्ष्यं दत्तोत्तरत्वात्. ‘‘निरञ्जनः परमं साम्यमुपैती’’ति श्रुतिस्तु जीवन्मुक्तपरा तस्मात्तार्किकमतस्यापि प्रलपितकल्पत्वं सिद्धमिति निष्कर्षः. वचनसङ्ग्रहस्तु: ‘‘अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते. इति मत्वा भजन्ते मां बुधा भावसमन्विताः’’ ‘‘को नु राजन्निन्द्रियवान् मुकुन्दचरणाम्बुजं. न भजेत्सर्वतोमृत्युरूपास्यममरोत्तमैः. देवोसुरो मनुष्यो वा यक्षो गन्धर्व एव वा. भजन्मुकुन्दचरणं स्वस्तिमान् स्याद्यथा वयम्’’ ‘‘भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः. ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्’’ ‘‘मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु. मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोसि मे’’इति.

आचार्यचरणद्वन्दनानन्दितात्मना ।
शिष्येण बालकृष्णानां किञ्चिदत्र विचारितम् ।।

प्रकाश

कर्मत्वेपि व्रतादीनां पृथगुपादानं ज्ञानाद्यङ्गत्वबोधनाय. ननु तेपि स्वयं कुर्वन्ति परानपि बोधयन्ति मिथ्यात्वनिःफलत्वाल्पफलत्वानन्दाभावज्ञाने कथं कुर्युः कथं वा बोधयेयुस्तेषामपि मतानां शमरजैमिनीगौतमादिप्रवर्तितत्वाच्चेत्यत आहु:पाषण्डैकप्रयत्नेष्विति. पाषण्डनिमित्तमेव मुख्यः प्रयत्नो येषु ‘‘त्वं च रुद्रे’’तिसार्द्धेन ‘त्वामाराध्ये’तिश्लोकद्वयेन च भगवता महादेवं प्रति तथैवाज्ञापनेन तथैव तेषां प्रवृत्तेः, स्वयं कर्मादिकरणेन स्वस्य महत्त्वख्यापनेन मतप्रवर्तनात्, ‘‘यद्यदाचरति श्रेष्ठ’’ इतिन्यायात्. आधुनिकानां तैरेव मोहितत्वात्. नहि देवादिप्रवर्तितशास्त्रत्वमात्रेण सन्मतत्वं किन्तु वेदाविरोधित्वे सति वेदानुसारित्वात्. अन्यथा बृहस्पतिप्रवर्तितबौद्धशास्त्रस्यापि सन्मतत्वप्रसङ्ग इत्यलं प्रसक्तानुप्रसक्त्या. शेषं प्राग्वत् ।।६ ।।

टिप्पणम्

‘त्वं चे’त्यारभ्य ‘‘भक्त्या त्वनन्यये’’त्यन्तानां वचनानां सङ्ग्रहः

‘‘त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय. अतथ्याति वितथ्याति दर्शयस्व महाभुज. प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु. त्वामाराध्य यथा शम्भो ग्रहीष्यामि वरं सदा. द्वापरादौ युगे भूत्वा कलया मानुपादिषु. स्वागमैः कल्पितैस्त्वं च जनान्मद्विमुखान् कुरु. मां च गोपय येन स्यात् सृष्टिपोत्तरोत्तरा’’. ‘‘यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः. स यत्प्रमाणं कुरुते लोकस्तदनु वर्तते’’ ।।६ ।।

प्रकाश

ननु ‘‘धर्मेण पापमपनुदति’’ ‘‘धर्मे सर्वं प्रतिष्ठिति’’मितिश्रुतेः पूर्वं दोषाभावाय धर्मः कार्यस्तेन चित्तशुद्धौ माहात्म्ये स्वरूपे च ज्ञाते तदाश्रयादिकं कार्यं न त्वाशुदोषवतैवान्यथा क्व योगिध्येयो भगवान् क्व दुष्टो जीव इत्याशङ्क्य ‘‘यमेवैष वृणुते’’ ‘रहुगणैतत्’ ‘‘भक्त्या त्वनन्यये’’ त्यादीनाङ्गीकृत्या महदनुग्रहेण च भक्त्या दोषवतापि गम्यत इति तन्माहात्म्यमपि तथेति महापुरुषद्वारा शरणागतौ सर्वं तत एव भविष्यतीत्यभिप्रेत्य भक्तानां भगवानेव चतुर्विधपुरुषार्थरूप इति प्रथमं धर्मरूपत्वं वदन्तस्तं प्रार्थयन्ते :

अजामिलादिदोषाणां नाशकोऽनुभवे स्थितः ।
ज्ञापिताखिलमाहात्म्यः कृष्ण एव गतिर्मम ।।७।।

अजामिलादीति. अनुभवविषयोभूतोऽजामिलदीनां ये दोषास्तेषां नाशकः. ज्ञापितं अखिलं माहात्म्यं येन तादृशः, तेन पापनिवर्तकत्वमिष्टप्रापकत्वं च धर्मकार्यमुक्तमतो दोषोपस्थितावपि तदाश्रयणमेव कार्यं भगवदीयानां न तु तं विहाय प्रायश्चित्तादीति सूचितम्. यद्वा, परम्परासम्बन्धेनापि पूर्वोक्तः, स्वनामसाम्येनाप्यजामिलोद्धारात् अनुभवे स्थितो महदनुग्रहेण. ज्ञापितमखिलं लीलादिरूपं तद्येन. शेषं प्राग्वत् ।।७।।

टिप्पणम्

‘‘रहुगणैतत्तपसा न याति न चेज्यया निर्वपणाद्गृहाद्वा. न वन्दनान्नैव जलाग्निसूर्यैर्विना महत्पादरजोभिषेकम्’’ ‘‘भक्त्या त्वनन्यया शक्य अहमेवंविधोर्जुन. ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपे’’ति. **अनुभवविषयोभूत** इति. अजामिलादीनामिति शेषः. पक्षान्तरे त्वजामिलेतरभक्तविषयीभूतः सन्निति तदर्थः. अजामिलस्य तु परम्परासम्बन्धेन स्वनाम्नैवोद्धारात्. **दोषोपस्थितावित्यारभ्य** सूचितमित्यन्ते ननु ‘‘श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्तते. आज्ञोच्छेदी मम द्रोही मद्भक्तोपि न मे प्रियः’’ इत्यनेन भक्तिमार्गीयस्यापि वेदविहितकरणत्वेन दोषोपस्थितावपि प्रायश्चित्तादेः प्राप्तत्वादित्थं कथमुच्यते इति चेत्, सत्यं, महादोषोपस्थितौ भगवदिच्छां ज्ञात्वा प्रायश्चित्तादिकरणम्. तदुक्तं सर्वनिर्णये ‘‘प्रायश्चित्तं पातकादीनामि’’ति. अल्पदोषोपस्थितौ तु तदाश्रयणमेव कार्यं न प्रायश्चित्तादि. एतदुक्तं सर्वनिर्णय ‘‘अनेनाल्पबर्हिमुखतायामपि भागवतमनुसन्धेयमित्युपायः कथित’’इति सर्वं समञ्जसम् ।।७।।

प्रकाश

ननु ‘‘तस्मात्स्वाध्यायोऽध्येतव्यः’’ ‘‘यं-यं क्रतुमधीते तेन तेनास्येष्टं भगवत्यग्नेर्वायोरादित्यस्य सायुज्यं गच्छती’’त्यादिश्रुतेः कर्ममार्गेपि ब्रह्मयज्ञाध्ययनादिनाग्क्यादिसायुज्यसिद्धे ‘ये त्वक्षर’मित्यादिना ज्ञानेनाप्यक्षरसायुज्यसिद्धेः को विशेषः कृष्णाश्रय इति किमिति तस्यैव

प्रार्थनमित्याशङ्क्य तारतम्यज्ञानार्थं सर्वस्वरूपनिरूपणपूर्वकमर्थरूपत्वं वदन्तस्तं प्रार्थयन्ते :

प्राकृताः सकला देवा गणितानन्दकं बृहत् ।
पूर्णानन्दो हरिस्तस्मात् कृष्ण एव गतिर्मम ।।८।।

प्राकृता इति. यस्मात्सकला देवाः प्राकृताः सत्त्वाहमारप्रभवत्वात्. बृहदक्षरं गणितानन्दकं ‘‘सैषानन्दस्य मीमांसा भवती’’ त्यारभ्य ‘‘ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्द’’ इत्यन्तेन ब्रह्मानन्दस्य गणितत्वात् कृष्ण एव हरिः सर्वदुःखहर्तापूर्णानन्दश्च.

टिप्पणम्

ये त्वक्षरमित्यादिनेति. ‘‘ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते. सर्वत्रगमचिक्त्यं च कूटस्थमचलं ध्रुवम्’’ ‘‘सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः. ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः’’ ‘‘क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसाम्. अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते’’ इत्येतेन तथेत्यर्थः. **सैषानन्दस्येति**. ‘‘सैषानन्दस्य मीमांसा भवति. युवा स्यात्साधु युवाध्यायकः. आशिष्ठो द्रढिष्ठो बलिष्ठः. तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् स एको मानुष आनन्दः. ते ये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य. ते ये शतं मनुष्यगन्धर्वाणामानन्दाः स एको देवगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य. ते ये शतं देवगन्धर्वाणामानन्दाः स एकः पितॄणां चिरलोकलोकानामानन्दाः स एक आजानजानां देवानामानन्दः श्रोत्रियस्य चाकामहतस्य. ते ये शतमाजानजानां देवानामानन्दाः स एकः कर्मदेवानां देवानामानन्दः, ये कर्मणा देवानपियन्ति श्रोत्रियस्य चाकामहतस्य. ते ये शतं कर्मदेवानां देवानामानन्दाः स एक इन्द्रस्यानन्दः श्रोत्रियस्य चाकामहतस्य. ते ये शतन्द्रिस्यानन्दाः स एको बृहस्पतेरानन्दः श्रोत्रियस्य चाकामहतस्य. ते ये शतं बृहस्पतेरानन्दाः स एकः प्रजापतेरानन्दः श्रोत्रियस्य चाकामहतस्य. ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्ये’’त्यनेन प्रपाठकेन

प्रकाश

पूर्णश्चासावानन्दश्च, पूर्ण आनन्दो येन यत्र यस्मादिति वा, तस्मात्कृष्ण एवं गतिर्ममास्त्वित्यर्थः. देवादिसायुज्येति तेषां प्रकृत्युपधानेन तन्मुक्तेः सगुणत्वेन ‘‘आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुने’’तिभगवद्वाक्यात्पुनः संसारसम्भवेनाल्पानन्दत्वेन स्वर्गवदमुक्तित्वात्. ज्ञानमार्गेऽक्षरमुक्तेर्निर्गुणत्वेप्यक्षरस्य गणितानन्दत्वेनाल्पत्वात् क्षुधितस्यात्यल्पभोजनमभोजनमेवेतिवदप्रयोजकत्वात्. अज्ञातार्थह्रस्वार्थ‘क’प्रत्ययेनाव्यक्तव्यं पुरुषोत्तमापेक्षयाल्पत्वं च सूचितम्. पूर्णानन्दत्वेन निर्गुणमुक्तिदायकत्वेन कृष्ण एव शरणं भावनीय इति सिद्धम्. तदुक्तं श्रीमदाचार्यचरणैः ‘‘निर्गुणा मुक्तिरस्माद्धि सगुणा सान्यसेवये’’ति. ननु ‘‘ताविमौ

वै भगवतो हरेरंशाविहागतौ. भारव्ययाय च भुवः कृष्णौ यदुकुरुद्वहौ’’ ‘‘कलाभ्यां नितरां हरे:’’ इत्यादिनांशत्वकथनाद्देहस्य च त्रिदिवेशादावपि पाञ्चभौतिकत्वजन्यत्वनियमेन जन्मश्रवणात् सुखस्यात्मगुणत्वेन भेदाच्च कथं पूर्णत्वं, कथं चानन्दरूपत्वमानन्दवत्त्वं तज्जनकत्वं वा परं वक्तुं शक्यमिति चेत्, मैवम्, ‘ताविमा’वित्यादीनामर्थानवगमात्. तथाहि भगवान् भक्तानामार्तिनाशार्थं सुखदानार्थं च प्रकटः भुवो भारव्ययायेहानयोः कृष्णार्जुनयोस्ताविमौ भगवतो हरेरंशौ चागतौ कृष्णयोर्यदुकुरुद्वहयोः प्रविष्यत्वाद्यदुकुरुद्वहौ कृष्णौ च जातौ, यत आगतौ तत्र यदुकुरुद्वहत्वाभावात्. तत्तत्कार्यकरणार्थं व्यूहेषु भगवतस्तत्तदंशापेक्षणादनयोरपि समर्षणांशत्वेन भूमाहरणार्थमपेक्षणात्. अंशयोरेवावतारत्वे पूर्णत्वाभावे ‘‘कृष्णस्तु भगवान् स्वयम्’’ ‘‘वसुदेवगृहे साक्षाद्भगवान् पुरुषः परः’’. ‘‘विदितोसि भवान् साक्षात्पुरुषः प्रकृतेः पर’’ इत्यादिकं विरुध्येतात्र चकारश्च व्यर्थः

टिप्पणम्

ब्रह्मानन्दस्य गणितत्वादित्यर्थः. **पूर्ण आनन्दो येनेति. मर्यादापुष्टिस्थस्येति.** शेषः. येनेति करणे तृतीया. ननु करणस्य व्यापारवत्त्वनियमात्कथमस्य फलोपधानासाधारणकारणत्वमिति चेत्, अत्रोच्यते, यत्र भगवान् साधनं कारयित्वैव फलं प्रयच्छति तत्र भागवतः करणत्वं, प्रयोज्यप्रवृत्युपहितप्रयोत्कृधर्मस्य साधनकारयितृत्वस्य तज्जन्यत्वेन व्यापारत्वादिति. **पूर्ण आनन्दो यस्मादिति.** पुष्यिस्थस्येत्यर्थः. हेतोर्निर्व्यापारसाधारणत्वात्. ननूभयोरपि मुख्यफलप्राप्तिवत्त्वेन को वा विशेषः पुष्टिस्थस्येति चेत्, साधनानपेक्षत्वस्यैव विशेषादित्यलं बहुना. ‘तविभावि’त्यारभ्य ‘‘प्रकृतेः परः’’ इत्यन्तानि वचनानि: ‘‘ताविमौ वै भगवतो हरेरंशाविहागतौ. भारव्ययाय च भुवः कृष्णौ यदुकुरुद्वहौ’’ ‘‘बभौ भूः पक्वसस्याढ्या कलाभ्यां नितरां हरेः’’ ‘‘अन्ये चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्’’ ‘‘वसुदेवगृहे साक्षात् भगवान् पुरुषः परः. जनिष्यते तत्प्रियार्थं सम्भवन्तु सुरस्त्रियः’’ ‘‘विदितोसि भवान् साक्षात् पुरुषः प्रकृतेः परः. केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृगि’’ति. चकारश्च व्यर्थः स्यादिति. ‘‘भारव्ययाय च भुवः’’ इत्यत्र

प्रकाश

स्यात्. तथाचोक्तं श्रीभागवत‘तत्त्वार्थदीपे’ ‘‘**सर्वातिरिक्तरूपेण नरः स्वावेशधारकः**. तपोऽतिरिक्तकार्यं तु पूर्णे कृष्णे न चान्यथे’’ति. ‘सर्वे’ति. व्याख्या तु ‘‘सर्वकार्यकर्तृत्वात्सर्वरूपो नारायणः. पुष्टिकार्यकर्तृत्वादिरिक्तोवतारः. तत्राधिकारमाशङ्क्य परिहरति ‘स्वायेशे’ति. नरस्तु तादृशमंशं विभर्ति न त्ववतार इत्यर्थः. ‘‘ताविमौ वै भगवत’’ इति मूलवाक्यं ‘‘कृष्णस्तु स्वयं भगवाने’’तेन विरुध्यते इति समाधत्ते ‘तपोतिरिक्ते’ति. मार्गद्वयस्थापनार्थमवतीर्णोपि पूर्णप्राकट्याभावे कार्यं न सेत्स्यतीति पूर्णे कृष्ण एव प्रविष्टावंशाविति मूलार्थ’’ इति. ‘बभावि’त्यत्र कलाभ्यामंशाभ्यां भूर्वभौ हरेः सम्बन्धिनी भूः पदैरनुभावैर्लीलाभिश्च नितरां बभावित्यर्थ इति. अन्यथोक्तवचनविरोधात्. देहस्य

पाञ्चभौतिकत्वजन्यत्वनियमस्य प्राकृतविषयत्वादप्राकृते यथावेदमेवार्थसिद्धेः, अन्यथा ज्ञानेच्छादीनामनित्यत्वनियमान्नित्यं ज्ञानादिकमपि तत्र न सिद्धयेत्. ननु ज्ञानादिभिरेव जगत्कर्तृत्वोपपत्तौ प्रत्यक्षबाधाच्च किमित्यानन्दमयो नित्यो देहोङ्गीकार्य इति चेत्, न कर्तृत्वनिर्वाहार्थमेव व्याप्तिबलेन नित्यज्ञानवत्तथाविधदेहस्वीकारात्. नित्यापरिच्छिन्नतनोः प्राकट्यस्यैव जन्मत्वेन जन्यत्वाभावात्. ‘आनन्दाद्ध्येव’ ‘‘नित्यं विज्ञानमानन्दं ब्रह्म’’ ‘‘स यथा सैन्धवधनः’’ ‘‘आनन्दं ब्रह्मणो रूपम्’’

टिप्पणम्

भक्तार्तिनाशसुखदानादिकं चकारेण गृह्यते. तच्च पुष्टिपुरुषोत्तमकार्यमेवेति तदतिरिक्तकल्पनायां चकारो व्यर्थः स्यादित्यर्थः. व्याप्तिबलेनेति. अन्वयव्यतिरेकव्याप्तिबलेनेत्यर्थः तथाहि यत्र-यत्र कर्तृत्वं तत्र-तत्र देहवत्त्वं यथा कुलालादावित्यन्वयव्याप्तिः. यत्र-यत्र देहवत्त्वाभावस्तत्र तत्र कर्तृत्वात्, न ह्यशरीरी कुलालः शक्नोति कार्यं कर्तुम्. वस्तु-वस्तु ‘‘आनन्दमात्रकरपादमुखोदरादिः’’ ‘‘सर्वतः पाणिपादान्त’’मित्यादिविरोधः. ‘‘अशरीरं शरीरेष्वि’’त्यादयस्तु पाञ्चभौतिकशरीरनिषेधपराः. न च व्रीहियववत् विकल्पसम्भवः प्रमेयापहारनिबन्धनाभावात्. ननु गीतायां चतुर्दशाध्याये ‘‘नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति’’ इत्युपादाय ‘‘गुणेभ्यो नान्यं कर्तारमनुपश्यत्यपि तु गुणा एव कर्माणि कुर्वन्तीति’’ श्रीधरस्वामिव्याख्यानाद्धेतुनिरूपितव्याप्तावप्यतिव्याप्तिरिति चेत्, अत्र वदाम:गुणानामपि देहवत्त्वेनैव तथाकथनं न तु केवलतया. अत एवाग्रे ‘‘गुणानतीत्ये’’ त्यस्य व्याख्याने ‘‘देहाद्याकारः समुद्भवः परिणामो येषां ते देहसमुद्भवास्तानेतांस्त्रीनपि गुणानतीत्यातिक्रम्ये’’त्युक्तं श्रीधरस्वामिभिरिति विद्वांस एव विदाङ्कुर्वन्तु. ‘आनन्दमात्रे’त्यारभ्य ‘मुदितवक्त्र’ इत्यन्तानि वचनानि. ‘‘निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो

प्रकाश

‘‘आनन्दमयोभ्यासात्’’ ‘‘आह च तन्मात्रम्’’ ‘‘केवलानुभवानन्दस्वरूपः’’ ‘‘आनन्दमात्रकरपादमुखोदरादिः’’ ‘‘बहूनि सन्ति नामानि’’ ‘‘त्रय्या चोपनिषद्भिश्च’’ ‘‘न चान्तर्न बहिर्यस्ये’’ त्यातिश्रुतिन्यायपुराणवाक्यसहस्रैः प्रमाणप्रकरणीयलीलाभिश्च पूर्ण एव देहप्राणेन्द्रियान्तःकरणात्मरूप एवानन्दरूपो ज्ञानरूपः पुरुषोत्तमो न त्वात्ममात्रमिति निर्बाधमबोधि. ‘‘नित्यं विज्ञान’’मिति ‘पूर्णमेवावशिष्यते’’ ‘‘भवानेकः शिष्यते शेषसंज्ञ’’ इत्यादिना नित्यत्वं, ‘‘एष ह्येवानन्दयाती’’तिश्रुतेरानन्दजनकत्वम्. ‘‘कृष्णः प्रीतमनाः’’ ‘‘वीक्ष्यासीदुत्तमा प्रीतिः’’ ‘जातहर्षः’ ‘‘मुदितवक्त्र उपयाती’’त्यादिनानन्दवत्त्वं चेति नानुपपन्नं किञ्चित्. तथाप्यानन्दत्वदेहत्वयोर्विरोध इति चेत्, न स्वस्वाधिकरणे प्रमाणैरेकत्रोभयोः सिद्ध्यसिद्धिभ्यां च विरोधाभावात्. तथाप्यानन्दस्य धर्मिरूपत्वे कथं धर्मरूपत्वमिति चेत्’’ ‘‘स यथा सैन्धवधनः’’ ‘‘यः सर्वज्ञः’’ इति श्रुतिभ्यां ज्ञानरूपत्वज्ञानाधारत्ववदानन्दरूपत्वतदाधारत्व

योरविरोधात्. श्रीमदस्मत्प्रभुचरणैः सर्वमेतद्यथा तथा विद्वन्मण्डने प्रपञ्चितमिति

मात्र प्रपञ्च्यते ।।८।।

टिप्पणम्

निश्चेतनात्मकशरीरगुणैश्च हीन:. आनन्दमात्रकरपादमुखोदरादि: सर्वत्र च स्वगतभेदविवर्जितात्मा'' ''बहूनि सन्ति नामानि रूपाणि च सुतस्य ते. गुणकर्मानुरूपाणि तान्यहं वेद नो जना:'' ''त्रय्या चोपनिषद्भिश्च साङ्ख्ययोगैश्च सात्वतै:. उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजम्'' ''न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम्. पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च य:'' ''नष्टे लोके द्विपरार्धावसाने महाभूतेष्वादि भूतं गतेषु. व्यक्तेऽव्यक्तं कालवेगेन याते भवानेक: शिष्यते शेषसंज्ञ:'' ''एवं वृन्दावनं श्रीमान् कृष्ण: प्रीतमना: पशुन्. रेमे सञ्चारयन्नद्रे: सरिद्रोधस्सु सानुग:'' ''वृन्दावनं गोवर्धनं यमुनापुलिनानि च. वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप'' ''सहबल: स्रगवतंसविलास: सानुषु क्षितिभृतो व्रजदेव्य:. हर्षयन् यर्हि वेणुरवेण जातहर्ष उपरम्भति विश्वम्'' ''यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनान्ते. मुदितवक्र उपयाति दुरन्तं मोचयन् व्रजगवां दिनतापमि''ति ।।८।।

प्रकाश

ननु विवेकधैर्याभ्यां स्थित्वा भक्तिकरणे भगवानपि वशे भवतीति किमिति दैन्येनाश्रय: प्रार्थ्यते इत्याशङ्क्य सर्वमनोरथपूरकत्वात्सर्वफलार्थं काम्यत्वात्कामरूपत्वं वदन्तस्तं प्रार्थयन्ते विवेकेति.

विवेकधैर्यभक्त्यादिरहितस्य विशेषत: ।
पापासक्तस्य दीनस्य कृष्ण एव गतिर्मम ।।९।।

पूर्वं प्रभुस्वरूपविचारेणाश्रयमुक्त्वा जीवस्वरूपविचारेणाधुनोच्यते. भगवान् स्वेच्छया सर्वं करिष्यति न प्रार्थनीय इतिनिश्चियो विवेक:. भक्तिविरोधिदु:खनिवृत्त्युपायाकरणेन त्रिदु:खसहनं धैर्यम्. भक्ति: साधनरूपापि. **आदिपदात्पुण्यम्. विशेषत** इति. तत्साधनैरपि रहितस्य. यद्वा, यत्किश्चित्सत्त्वेपि विशेषतो नास्तीति न फलसिद्धि:. किञ्च, **दीनस्य** दरिद्रस्यात: सर्वसाधनरहितस्य. पापे आसक्तस्येति विपरीतसाधनवतो न तु प्रामादिकपापस्य. कृष्ण एवेति पूर्ववत्. अन्यत्र यत्किञ्चिद्वैगुण्येपि वैफल्याद्देवताकोपादनिष्टजननादल्पदत्वाच्चेदृशस्य विवेकादिकं दत्वा स्वतो वा सर्वफलदायक: परमकृपालु: कृष्ण एवेति स एवाश्रयणीय इति हृदयम्. नन्वस्मच्छब्दस्योच्चारयितृवाचकत्वादत्राचार्यचरणानां तथात्वाद्विशेषणान्यसङ्गतानीति चेत्, न अस्यान्यार्थत्वेनान्याधिकारेणकथनाद्भगवता वेदेषु ''प्रयतपाणि: शरणं प्रपद्ये'' ''भूयिष्ठान्ते नम उक्तिं विधेम'' ''स्वस्ति मेस्तु वनस्पते'' इत्यादौ यजमानाधिकारेण कथन इवादोषत्वादिति सर्वमनवद्यम् ।।९।।

ननु सर्वथा नि:साधनस्य शरणागतावपि कथं समीहितसिद्धि:, भगवांस्तु तत्तत्कृतिसापेक्षस्तस्मै तस्मै फलं ददाति प्रत्युत भगवदेकशरणस्य तदेकमनसो

देवान्तरानादरेण तत्कृता अपि विघ्ना: स्यु: ''श्रेयांसि बहुविघ्नानी''तिवाक्यादित्याशङ्क्य मोक्षप्राप्यत्वान्मोक्षरूपत्वं विज्ञापने च वदन्त: **समादधते सर्वसामर्थ्यसहित** इति.

सर्वसामर्थ्यसहित: सर्वत्रैवाखिलार्थकृत् ।
शरणस्थसमुद्धारं कृष्णं विज्ञापयाम्यहम् ।।१०।।

टिप्पणम्

मोक्षप्राप्यत्वादिति. स्वरूपलाभप्राप्यत्वादित्यर्थ:. तथाच श्रुति: ''ब्रह्मविदाप्नोति परमि''ति. अस्या अर्थ: परं पुरुषोत्तमं प्राप्नोतीपि. मोक्षरूपत्वमिति. भक्तिमार्गस्थाय भगवद्भजनं कुर्वते स्वीयाय सर्वफलदातृत्वं भगवत एव तथाचाक्षरफलदातृत्वमपि स्वस्यैवैति तद्रूपत्वान्मोक्षरूपत्वमित्यर्थ:. तथाचोक्तं निबन्धे ''यथा सारथी रथी तदन्त:स्थितश्च तथान्तर्याम्यक्षरं कृष्ण:. एवं सति पुरुषोत्तमत्वेन सर्वत्र दर्शनं भवति परब्रह्मैव त्रिप्रकारेण वर्तते इति त्रयो भेदा इति''.

प्रकाश

सर्वं पूर्णं सामर्थ्यं सर्वेषां सर्वेषु वा, **तत्सहित** इतीच्छया स्वतोपि सर्वं करोति. यदि मर्यादां रक्षेत्तदा भगवत्त्वेन ज्ञानैश्वर्यधर्मादीनां सिद्धत्वात्तत्तद्दत्वापि तत्तत्फलं दद्यात्. कदाचित्पूर्वस्थितमपि स्वस्मिन्नयेत्, सर्वत्र स्वस्यैव सामर्थ्यात्. ''यद्यद्विभूतिमत्'' ''मत्त: सर्वं प्रवर्तत'' इत्यादिवाक्यै: सर्वं सामर्थ्यं येषां सुदर्शनादीनां तै: सहित इति वा, तैरपि भक्तानिष्टनिवारणात्, ''अव्याहतानि कृष्णस्ये''तिवाक्यात्. ननु सामर्थ्ये सत्यपि कदाचिदाश्रितं न रक्षेत्, मर्यादयैव वा यदि फलं दद्यात्तदा किमाश्रयेणेत्यत आहु:सर्वत्रैव देशेषु वर्णेषु आश्रमेषु कर्मादिषु वाखिलार्थान्करोतीत्यखिलार्थकृत् ताच्छील्यादौ क्विप् 'सकृदेव' ''ये दारागारपुत्राप्ते''त्यादिवाक्यै: सकृदपि शरणागतं भगवान् रक्षति किं पुनर्भजत:. मर्यादयापि फलदानेन्यनैरपेक्ष्येण भजतो भगवान्मर्यादानपेक्ष: फलं प्रयच्छति, विहितत्वादिना भजतो मर्यादासापेक्षो ''ये यथा मां प्रपद्यन्त'' इति तन्मर्यादाया एव तादृशीत्वान्न क्षति:. अत एव ''व्रजस्योवाह वै हर्षम्'' ''चिक्रीडे जनयन्मुदम्'' ''मनोरथान्तं श्रुतयो यथा ययु:'' ''मुकुन्दो मुक्तिं ददाती''त्यादि ''तथा न ते माधव'' ''मर्त्यो मृत्युव्यालभीत: पलायन्'' ''वसति मनसि यस्ये''त्यादिवाक्यै: कालयमादयोपि चेद्भगवदीयान्निवर्तन्ते कुतस्तरां पुनरन्ये विघ्नकर्तार इति न किञ्चिद्दूषणम्. पूर्वोक्तं शरणे स्थितं सम्यगमनायासेनोद्धरति, सकृदागतन्तु यथाकथञ्चित्. ईदृशं श्रीकृष्णमहमाश्रयं विज्ञापयामि. 'कृष्णे'तिसम्बोधनपाठे शरणस्थसमुद्धारं विज्ञापयामीत्यन्वय:. अनेनेश्वरे दीनभाव: कर्तव्य इति सूचितम्, दीनभावेन कृतस्यैवेश्वरतोपहेतुत्वात् ।।१०।।

---

१ नेति क्वचिन्नास्ति. २ तत्तत्कृता इत्यपि पाठ:.

टिप्पणम्

‘यद्यदा’रभ्य अव्याहतानी’त्यन्तानि वचनानि ‘‘यद्यद्विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा. तत्तदेवावगच्छ त्वं मम तेजोंशसम्भवम्’’ ‘‘अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते. इति मत्वा भजन्ते मां बुधा भावसमन्विताः’’ ‘‘अव्याहतानि कृष्णस्य चक्रादीन्यायुधानि तम्. रक्षन्ति सकलापद्भ्यो येन विष्णुरूपासित’’ इति. ताच्छील्यादौ क्विबिति. ‘‘आक्वेस्तच्छीलतद्धर्मतत्साधुकारिष्वि’’तिस्मरणात्. ‘सकृदेवे’ त्यारभ्य ‘‘तत्तथा साधयिष्यामी’’त्यन्तानां वचनानां सङ्ग्रहः ‘‘सकृदेव प्रपन्नाय तवास्मीति च याचते. अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम’’ ‘‘ये दारागारपुत्राप्तप्राणान् वित्तमिमं परम्. हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे’’ ‘‘ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्. मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः’’ ‘‘दर्शयंस्तद्विदां लोके आत्मनो भृत्यवश्यताम्. व्रजस्योवाह वै हर्षं भगवान् वालचेष्टितैः’’ ‘‘ततस्तु भगवान् कृष्णो वयस्यैर्व्रजबालकैः. सहरामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदम्’’ ‘‘तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथान्तं श्रुतयो यथा ययुः. स्वैरुत्तरीयैः कुचकुमुमामितैरचीक्लृपन्नासनमात्मबन्धवे’’ ‘‘राजन् पतिर्गुरुरलं भवतां यदूनां देवप्रियः कुलपतिः क्वच किमरो वः. अस्त्वेवमङ्ग भजतां भगवान् मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम्’’ ‘‘तथा न ते माधव तावकाः क्वचिद् भ्रश्यन्ति मार्गात्त्वयि बद्धसौहृदाः. त्वयाभिगुप्ता विचरन्ति निर्भया विनायकानीकपमूर्धसु प्रभो’’ ‘‘मर्त्यो मृत्युव्यालभीतः पलायन् सर्वान् लोकान् निर्भयान्नाध्यगच्छत्. त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैति’’ ‘‘वसति मनसि यस्य सोव्ययात्मा पुरुषबरस्य न तस्य दृष्टिपातः. गतिरथ मम वा तवास्ति चक्रप्रतिहतवीर्यबलस्य सोन्यलोकः’’ ।।१०।।

प्रकाश

‘‘दश वै पशोः प्राणा आत्मैकादश’’ इतिश्रुतेः प्राणानामिव सर्वसाधकत्वं ज्ञापयितुं दशभिः श्लोकैः स्तोत्रं निरूप्य फलस्यात्मवदक्षयत्वं ज्ञापयितुमेकादशेनात्मरूपेणैतत्स्तोत्रपाठफलमाहुः

कृष्णाश्रयमिदं स्तोत्रं यः पठेत्कृष्णसन्निधौ ।
तस्याश्रयो भवेत्कृष्ण इति श्रीवल्लभोऽब्रवीत् ।।११।।

कृष्ण आ समन्तान् श्रीयते सेव्यतेनेन, कृष्ण आश्रयो येन यस्मादिति वेति **कृष्णाश्रयम्,** इदमेव कृष्णाश्रयं यथार्थनिरूपकत्वान्नान्यत्. कृष्णसन्निधौ तन्निमित्तं वा, इदं य**ः पठेत् तस्य कृष्ण आश्रयो भवेत्**. अत्र ‘‘हेतुहेतुमतोर्लिङ्’’ इद मिति नान्यपाठेनेदं फलं, स्वरूपाज्ञानात्. नन्वल्पायासादेतस्तोत्रपाठमात्रेण कथमेतत्फलं स्यादित्याशङ्क्याहुः **श्रीवल्लभ इति. इदमब्रवीत् अवदत्**. स्वस्य भगवत्स्वरूपाभिज्ञत्वाद्भगवता सर्वोद्धारार्थं प्रकटितत्वादुद्धारकस्वरूपत्वाच्च नात्राप्रामाण्यशमा, नहि भगवान् सत्यवाक् स्ववाचमन्यथाकरोति. यत्र प्रसङ्गान्नारदकृतं ‘‘तत्तथा साधयियिष्यामि यद्गीतं तन्महान्मने’’ति सदनुग्रहो भगवान् स्वकृतमिव

मन्यमानः पुरुषोत्तमः स्वयं तत्र गत्वा नलकूबरमणीग्रीवोद्धारं कृतवान्, तत्र स्वयं सर्वार्थं प्रकटितस्य स्वस्वरूपस्य कृतौ वचने वा किं-किं न करिष्यतीति

टिप्पणम्

देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ ।
तत्तथा साधयिष्यामि यद्गीतं तन्महात्मनेति ।।११।।

प्रकाश

तत्कृपायां सर्वं भवतीति सर्वमनवद्यम् ।।११।।

श्रीमद्विठ्ठलनाथपादकमले सम्बन्ध भक्त्या मुदा
कृष्णैकाग्रधियोथ तातचरणान् तादृक्पितृव्यानपि ।
श्रीकृष्णाश्रयसंज्ञके स्तुतिवरे कल्याणरायाभिधः
श्रीगोविन्दसुतः प्रकाशमकरोद्भूयान्मुदे सद्धियाम् ।।१।।

इति श्रीविठ्ठलनाथचरणकमलैकतानश्रीकल्याणरायविरचितः
कृष्णाश्रयस्तोत्रप्रकाशः समाप्तः ।

टिप्पणम्

दूरीकरोति विकटं किल समटानां सङ्घं विशमटतरं वरसेवकानाम् ।
यत्पद्मरागमणिवर्यविराजेमानं तद्वेमटेशमुकुटं प्रकटं रटामः ।।१।।
निखिलपण्डितमण्डलमण्डितं हरिमुखाब्जसरोरुहभास्करम् ।
अतुलमङ्गलनामविराजितं जनमनोहररूपमहं भजे ।।२।।

श्रीमत्कल्याणां नमस्कृत्य पदद्वयम् ।
कृष्णाश्रयप्रकाशस्य तत्प्रणीतस्य टिप्पणम् ।।३।।
गुरुश्रीबालकृष्णानामात्मजेन सतां मतम् ।
कृतं गोविन्दराजेन नाम्ना तत्त्वनिरूपणम् ।।४।।

इति श्रीमत्कल्याणरायचरणकोकनदमधुपायमानान्तःकरणतिधरो
पनामकबालकृष्ण भट्टात्मजगोविन्दराजकृतं तत्त्वनिरूपणाभिधं
कृष्णाश्रयप्रकाशटिप्पणं समाप्तिमगमत् ।

---

१ श्रुतिपदं क्वचिन्नास्ति. २स्ववच इति पाठः क्वचित्.